योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन ।
यो ऽपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतो ऽस्मि ॥

yogena cittasya padena vāchāṃ
malaṃ śarīrasya ca vaidyakena
yo ʻpākarot taṃ pravaraṃ munīnāṃ
patañjaliṃ prāñjalir ānato ʻsmi



अथ योगानुशासनम् ।।१.१।।

atha yōgānuśāsanam

अथेत्ययमधिकारार्थः।

athēty ayam adhikārārthaḥ

योगानुशासनं शास्त्रमधिकृतं वेदितव्यम्।

yōgānuśāsanaṃ śāstram adhikṛtaṃ vēditavyam

योगः समाधिः।

yōgaḥ samādhiḥ

स च सार्वभौमश्चित्तस्य धर्मः।

sa ca sārva-bhaumaś cittasya dharmaḥ

क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः।

kṣiptaṃ mūḍhaṃ vikṣiptam ēkāgram niruddham
iti citta-bhūmayaḥ

तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते।

tatra vikṣiptē cētasi vikṣēpōpasarjanībhūtaḥ samādhir na yōga-pakṣē vartatē.

यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान्कर्मबन्धनानि श्लथयति निरोधमभिमुखं करोति स संप्रज्ञातो योग इत्याख्यायते।

yastv ēkāgrē cētasi sad-bhūtam artham pradyōtayati kṣiṇōti ca klēśān karma-bandhanāni ślathayati nirōdham abhimukham karōti sa samprajnātō yoga ity ākhyāyatē

स च वितर्कानुगतो विचारानुगत आनन्दानुगतो ऽस्मितानुगत इत्युपरिष्टात्प्रवेदयिष्यामः।

sa ca vitarkānugatō vicārānugata ānandānugatō 'smitānugata ity upariṣṭāt pravēdayiṣyāmaḥ

सर्ववृत्तिनिरोधे त्वसंप्रज्ञातः समाधिः।

sarva-vṛtti-nirōdhē tv asamprajnātaḥ samādhiḥ

योगश्चित्तवृत्तिनिरोधः।।१.२।।

yōgaś citta-vṛtti-nirōdhaḥ

सर्वशब्दाग्रहणात्संप्रज्ञातोऽपि योग इत्याख्यायते।

sarva-śabdāgrahaṇāt saṃprajñātō 'pi yōga ity ākhyāyate

चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्।

cittaṃ hi prakhyā-pravṛtti-sthiti-śīlatvāt triguṇam

प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां
संसृष्टमैश्वर्यविषयप्रियं भवति।

prakhyā-rūpaṃ hi citta-sattvaṃ rajas-tamōbhyāṃ
saṃsṛṣṭam aiśvarya-viṣaya-priyam bhavati

तदेव तमसाऽनुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति।

tad eva tamasā 'nuviddham adharm-ājñān-āvairāgy-
ānaiśvary-ōpagam bhavati

तदेव प्रक्षीणमोहावरणं सर्वतः
प्रद्योतमानमनुविद्धरजोमात्रया
धर्मज्ञानवैराग्यैश्वर्योपगं भवति।

tad eva prakṣīṇa-mōhāvaraṇaṃ sarvataḥ
pradyōtamānam anuviddha-rajō-mātrayā
dharma-jñāna-vairāgy-aiśvary-ōpagan bhavati

तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं
सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति।

tad ēva rajōlēśa-malāpētaṃ
svarūpa-pratiṣṭhaṃ sattva-puruṣānyatā-khyāti-mātram
dharma-mēgha-dhyānōpagam bhavati

तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः।

tat param prasaṃkhyānam ity ācakṣate dhyāyinaḥ

चितिशक्तिपरिणामिन्यप्रतिसंक्रमा
दर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयमतो
विपरीता विवेकख्यातिरिति।

citi-śakti-pariṇāminy apratisaṃkramā darśitaviṣayā
śuddhā cānantā ca sattva-guṇātmikā cēyam
atō viparītā vivēka-khyātir iti

अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि।

atas tasyāṃ viraktañ cittam tām api khyātim niruṇaddhi

तदवस्थं संस्कारोपगं भवति । स निर्बीजः समाधिः।

tad-avasthaṃ saṃskār-ōpagam bhavati.

sa nirbījaḥ samādhiḥ

न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातः।

na tatra kiṃcit saṃprajñāyata ity asaṃprajñātaḥ

द्विविधः स योगश्चित्तवृत्तिनिरोध इति।

dvividhaḥ sa yōgaś citta-vṛtti-nirōdha iti

तदवस्थे चेतसि विषयाभावाद्
बुद्धिबोधात्मा पुरुषः किंस्वभाव इति।

tad-avasthe cētasi viṣayābhāvād
buddhi-bōdhātmā puruṣaḥ kiṃ svabhāva iti

तदा द्रष्टुः स्वरूपेऽवस्थानम्।।१.३।।

tadā draṣṭuḥ svarūpe 'vasthānam

स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये।

svarūpa-pratiṣṭhā tadānīñ citi-śaktir yathā kaivalye

व्युत्थानचित्ते तु सति तथाऽपि भवन्ति न तथा।

vyutthāna-cittē tu sati tathā 'pi bhavanti na tathā

कथं तर्हि दर्शितविषयत्वात्

katham tarhi darśita-viṣayatvāt

वृत्तिसारूप्यमितरत्र ।।१.४ ।।

vṛtti-sārūpyam itaratra

व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः।

vyutthānē yāś citta-vṛttayas tad-aviśiṣṭa-vṛttiḥ puruṣaḥ

तथा च सूत्रम् –’एकमेव दर्शनं ख्यातिरेव दर्शनम्’ इति।

tathā ca sūtram - 'ekam eva darśanaṁm khyātir eva darśanam' iti

चित्तमयस्कान्तमणिकल्पं संनिधिमात्रोपकारि दृश्यत्वे स्वं भवति पुरुषस्य स्वामिनः।

cittam ayaskānta-maṇi-kalpaṃ saṃnidhi-mātropakāri dṛśyatve svam bhavati puruṣasya svāminaḥ

तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः संबन्धो हेतुः।

tasmāc citta-vṛtti-bōdhe puruṣasyānādiḥ sambandho hetuḥ

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ।।१.५।।

vṛttayaḥ pañcatayyaḥ kliṣṭākliṣṭāḥ

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ।।१.६।।

pramāṇa-viparyaya-vikalpa-nidrā-smṛtayaḥ

प्रत्यक्षानुमानागमाः प्रमाणानि ।।१.७।।

pratyakṣānumānāgamāḥ pramāṇāni

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ||१.८||

viparyayo mithyājñānam atad-rūpa-pratiṣṭham

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ||१.९||

śabda-jñānānupātī vastu-śūnyo vikalpaḥ

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ||१.१०||

abhāva-pratyayālambanā vṛttir nidrā

अनुभूतविषयासंप्रमोषः स्मृतिः।।१.११।।

anubhūta-viṣayāsaṃpramoṣaḥ  smṛtiḥ

अभ्यासवैराग्याभ्यां तन्निरोधः।।१.१२।।

abhyāsa-vairāgyābhyām  tan-nirodhaḥ

तत्र स्थितौ यत्नोऽभ्यासः।।१.१३।।

tatra  sthitau  yatno  'bhyāsaḥ

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढ़भूमिः।।१.१४।।

sa tu dīrgha-kāla-nairantarya-sat-kārāsevitō dṛdha-bhūmiḥ

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।।१.१५।।

dṛṣṭānuśravika-viṣaya-vitṛṣṇasya vaśīkāra-saṃjñā vairāgyam

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ।।१.१६ ।।

tat-param puruṣa-khyātēr guṇa-vaitṛṣṇyam

वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः ।।१.१७ ।।

vitarka-vicārānandāsmitā-rūpānugamāt saṃprajñātaḥ

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ।।१.१८ ।।

virāma-pratyayābhyāsa-pūrvaḥ saṃskāra-śeṣo 'nyaḥ

भवप्रत्ययो विदेहप्रकृतिलयानाम् ।।१.१९।।

bhava-pratyayo videha-prakṛti-layānām

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ।।१.२०।।

śraddhā-vīrya-smṛti-samādhi-prajñā-pūrvaka itareṣām

तीव्रसंवेगानामासन्नः ।।१.२१।।

tīvra-saṃvegānām āsannaḥ

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः।।१.२२।।

mṛdu-madhyādhi-mātratvāt tatō 'pi viśeṣaḥ

ईश्वरप्रणिधानाद्वा।।१.२३।।

īśvara-praṇidhānād vā

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।।१.२४।।

kleśa-karma-vipākāśayair aparāmṛṣṭaḥ puruṣa-viśeṣa īśvaraḥ

तत्र निरतिशयं सर्वज्ञबीजम्।।१.२५।।

tatra niratiśayaṃ sarvajña-bīijam

पूर्वेषामपि गुरुः कालेनानवच्छेदात्।।१.२६।।

pūrveṣām api guruḥ kālenānavacchedāt

तस्य वाचकः प्रणवः।।१.२७।।

tasya vācakaḥ praṇavaḥ

तज्जपस्तदर्थभावनम् ।।१.२८ ।।

taj-japas  tad-artha-bhāvanam

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ।।१.२९ ।।

tataḥ  pratyak-cetanādhigamo  'pyantarāyābhāvaś  ca

व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्ध
भूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ।।१.३० ।।

vyādhi-styāna-saṃśaya-pramādālasyāvirati-bhrānti-
darśanālabdha-bhūmi katvān  avasthitatvāni citta-vikṣepās
te  'ntarāyāḥ

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः॥१.३१॥

duḥkha-daurmanasyāṅgamejayatva-śvāsa-praśvāsā vikṣepa-saha-bhuvaḥ

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः॥१.३२॥

tat-pratiṣedhārtham eka-tattvābhyāsaḥ

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥१.३३॥

maitrī-karuṇā-muditōpēkṣāṇāṃ sukha-duḥkha-puṇyāpuṇyaviṣayāṇām bhāvanātaś citta-prasādanam

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य॥१.३४॥

pracchardana-vidhāraṇābhyāṃ vā prāṇasya

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी॥१.३५॥

viṣayavatī vā pravṛttir utpannā manasaḥ sthiti-nibandhanī

विशोका वा ज्योतिष्मति।।१.३६।।

viśokā vā jyotiṣmati

वीतरागविषयं वा चित्तम्।।१.३७।।

vītarāga-viṣayaṃ vā cittam

स्वप्ननिद्राज्ञानालम्बनं वा।।१.३८।।

svapna-nidrājñānālambanaṃ vā

यथाभिमतध्यानाद्वा।।१.३९।।

yathābhimata-dhyānād vā

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः।।१.४०।।

paramāṇu-parama-mahattvānto 'sya vaśīkāraḥ

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः।।१.४१।।

kṣīṇa-vṛtter abhijātasyeva maṇer grahītṛ-grahaṇa-grāhyeṣu tatstha-tadañjanatā samāpattiḥ

तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः।।१.४२।।

tatra  śabdārtha-jñāna-vikalpaiḥ saṃkīrṇā savitarkā samāpattiḥ

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का।।१.४३।।

smṛti-pariśuddhau svarūpa-śūnyevārtha-mātra-nirbhāsā nirvitarkā

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता।।१.४४।।

etayaiva savicārā nirvicārā ca sūkṣma-viṣayā vyākhyātā

सूक्ष्मविषयत्त्वं चालिङ्गपर्यवसानम्।।१.४५।।

sūkṣma-viṣayattvam cāliṅga-paryavasānam

ता एव सबीजः समाधिः।।१.४६।।

tā eva sabījaḥ samādhiḥ

निर्विचारवैशारद्येऽध्यात्मप्रसादः ।।१.४७।।

nirvicāra-vaiśāradye 'dhyātma-prasādaḥ

ऋतंभरा तत्र प्रज्ञा ।।१.४८।।

ṛtaṃbharā tatra prajñā

श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वात् ।।१.४९।।

śrutānumāna-prajñābhyām anya-viṣayāviśeṣārthatvāt

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ।।१.५० ।।

tajjaḥ  saṃskāro  'nya-saṃskāra-pratibandhī

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ।।१.५१ ।।

tasyāpi  nirōdhe  sarva-nirodhān  nirbījaḥ  samādhiḥ